# Krishna Stotram

# કૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Krishna Stotram

File name : kRRiShNastotramvAdirAja.itx

Category : vishhnu, vAdirAja, vishnu, stotra, krishna

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Lata Murali, Revathy R.

Latest update : June 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 19, 2024

*sanskritdocuments.org*

# કૃષ્ણસ્તોત્રમ્

શ્રીબ્રહ્મરુદ્રગરુડેન્દ્રનતં શરણ્યં
સર્વાશુભપ્રશમનં ભુવનૈકનાથમ્ ।
સદ્રૂપ્યપીઠપુરમધ્યગમિન્દિરેશં
ગોવર્ધનોદ્ધરણદક્ષમહં નતોઽસ્મિ ॥ ૧॥

વજ્રાઙ્કુશધ્વજસરોજયુતાઙ્ઘ્રિમૂલં
સન્દીપ્યમાનનખચન્દિરકાન્તિકાન્તમ્ ।
સિઞ્જત્સુનૂપુરપદં વરવૃત્તજઙ્ઘં
પૂર્ણેન્દુભાનુસમવર્તુલજાનુયુગ્મમ્ ॥ ૨॥

સ્તમ્બેરમેન્દ્રસુકરોરુમુદારકાઞ્ચી-
પીતામ્બરોદ્યતકટિં શુભનિમ્નનાભિમ્ ।
શાતોદરાર્પિતવલિત્રયમબ્જનાભં
શ્રીવત્સકૌસ્તુભરમાલયવક્ષસં તમ્ ॥ ૩॥

શ્રીકમ્બુકન્ધરસમર્પિતવૈજયન્તી
સદ્ધારકઞ્જશુભમાલિકયોલ્લસન્તમ્ ।
સદ્દણ્ડપાશકરમૂર્જિતહારભૂષં
બિમ્બાધરોષ્ઠમરવિન્દદલાયતાક્ષમ્ ॥ ૪॥

કર્ણોજ્જ્વલન્મકરકુણ્ડલશોભિગણ્ડં
સદ્રત્નમૌક્તિકલસચ્છુભનાસિકાઢ્યમ્ ।
શાર્ઙ્ગાયિતભ્રુવમગણ્યગુણાભિરામ-
મુદ્યદ્દિવાકરનિભાભવિશાલફાલમ્ ॥ ૫॥

શ્રીમત્કિરીટવરમણ્ડિતરમ્યશીર્ષ-
માદ્યન્તશૂન્યમસિતં સુખતીર્થનાથમ્ ।
શ્રીનન્દનન્દનમમેયમગાધબોધ-
મીષત્સ્મિતેન્દુવદનં શરણં વ્રજામિ ॥ ૬॥

કિં સંસ્તવીમિ તવ મત્સ્ય સુકૂર્મ કોલ
શ્રીમન્નૃશિંહ વરવામન ભાર્ગવેશ ।
શ્રીજાનકીરમણ યાદવકૃષ્ણ બુધ્દ
કલ્ક્યાદિરૂપ કૃતિસેવિતસત્પ્રભાવ ॥ ૭॥

શ્રીકૃષ્ણદેવ કરુણાકર સૌમ્યરૂપ
શ્રીવાદિરાજમુનિહૃત્કમલાધિવાસ ।
ભક્તોત્સવેપ્સિતસુતત્વરહસ્યદીપ
માં પાહિ તે ચરણસેવકભૃત્યભૃત્યમ્ ॥ ૮॥

વાદિરાજાખ્યયતિના કૃષ્ણસ્ત્રોત્રમિદં કૃતમ્ ।
હરેઃ કૃપાપ્રયેઽજસ્ત્રં પઠતઃ પ્રીયતે હરિઃ ॥ ૯॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં કૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Lata Murali

*Krishna Stotram*

pdf was typeset on June 19, 2024

Please send corrections to *sanskrit@cheerful.com*